Ashadhamasakrite Shivashatashtanama Stotram Masa4

# आषाढमासकृते शिवशताष्टनामस्तोत्रम् मास ४

## Document Information

Text title : Ashadhamasakrite Shivashatashtanama Stotram Masa 4

File name : AShADhamAsakRRiteshivashatAShTanAmastotrammAsa4.itx

Category : shiva, shivarahasya, aShTottarashatanAma, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 17 AShADhArchanam | 55-71|| See corresponding nAmAvalI

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# आषाढमासकृते शिवशताष्टनामस्तोत्रम् मास ४

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

नम इज्याय पूज्याय उपजीव्याय ते नमः ।
नमः क्षेत्राय वृद्धाय वत्सलाय नमो नमः ॥ ५५॥

नमो भूताय भव्याय नमःसत्याय बभ्रवे ।
नमो वै पद्मवर्णाय मृत्युघ्नाय च मृत्यवे ॥ ५६॥

नमो गौरशरीराय श्यामाय रोहिताय च ।
महासन्ध्याभ्रवर्णाय चारुरूपाय धीमते ॥ ५७॥

नमः कमलहस्ताय विश्वग्रासाय शम्भवे ।
प्रमाणाय सुरेशाय अवध्यायामराय च ॥ ५८॥

नमो रूपायारूप्याय शाश्वतायाक्षताय च ।
बृह्मणे महते चैव विभ्रान्ताय कुशाय च ॥ ५९॥

दुर्गमाय महेशाय रोधाय कपिलाय च ।
अप्रतर्क्यशरीराय बिल्मिने रसगाय च ॥ ६०॥

सिकत्याय प्रवाह्याय रेश्मियाय नमोनमः ।
प्रसृताय पुराणाय वामदेवाय दण्डिने ॥ ६१॥

सुमेधसे कुलालाय नमस्तेऽस्तु शिखण्डिने ।
चित्राय चित्रवर्माय त्रिणेत्राय त्रिशूलिने ॥ ६२॥

चेकितानाय कृष्णाय सुहिताय हिताय च ।
नमः क्षान्ताय दान्ताय वज्रसंहननाय च ॥ ६३॥

रक्षोघ्नाय विषघ्नाय शितिकण्ठाय मन्यवे ।
नमः सोमाय रुद्राय सुताम्रायारुणाय च ॥ ६४॥

भर्गायोग्राय भीमाय तिग्मायुधधराय च ।
सुमोदाय प्रमोदाय मधुप्रीताय ते नमः ॥ ६५॥

प्राणाय प्रणवेशाय नमस्तेऽस्तु सुवाससे ।
भिषजे महते चैव दुर्गाध्यक्षाय लिङ्गिने ॥ ६६ ॥

नक्तञ्चराय मुक्ताय भक्तपापहराय च ।
अनामयाय शर्वाय महाकालाय धून्वते ॥ ६७॥

पञ्चाक्षरप्रियायाथ मृगाजिनधराय च ।
आषाढाय विराधाय दूताय प्रहिताय च ॥ ६८॥

तमोघ्नाय हिमघ्नाय क्रतवे ऋतवे नमः ।
ज्योत्स्नाज्वालाय फालाय ? विशालाय नमोनमः ॥ ६९॥

ऊर्ध्वरोम्णे महारोम्णे कृत्तिवासाय ते नमः ।
मृगव्याधाय दक्षाय दक्षशिक्षाय ते नमः ॥ ७०॥

इत्येतन्नामभिः पूज्यो ज्येष्ठदेवो महेश्वरः ।
स्तवेनानेन देवेशमाषाढे संस्तुवीत माम् ॥ ७१॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तमाषाढमासकृते शिवशताष्टनामस्तोत्रं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः १७ आषाढार्चनम् । ५५-७१ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 17 AShADhArchanam . 55-71..

Notes:

Śiva शिव delivers to Devī देवी; Āṣaḍhamāsakṛte ŚivaŚatāṣṭanāmaStotram आषाढमासकृते शिवशताष्टनामस्तोत्रम् comprising of 108 Names १०८ नामानि of Śiva शिव while detailing about His Worship during the Āṣaḍha māsa आषाढ मास. The count seems to exceed though.

The corresponding Āṣaḍhamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ आषाढमासकृते शिवशताष्टनामावलिः derived from the Āṣaḍhamāsakṛte ŚivaŚatāṣṭanāmaStotram आषाढमासकृते शिवशताष्टनामस्तोत्रम्, and a Āṣaḍhamāsakṛte ŚivaStutiḥ आषाढमासकृते शिवस्तुतिः can be accessed from one of the links provided below.

More details about worshiping Śiva शिव during individual Māsa मास are given in Chapters 13-25.

Selected Śloka-s श्लोकाः from Chapter 17 are presented on this page.

Proofread by Ruma Dewan

*Ashadhamasakrite Shivashatashtanama Stotram Masa4*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*